National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2023;** 1(46): 239-240
© 2023 NJHSR
www.sanskritarticle.com

**पल्लि नागमणी**
साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**पल्लि नागमणी**
साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

# शिवकथामृतमहाकाव्ये अवतारः वर्णनम्

**पल्लि नागमणी**

**शिवकथामृत महाकाव्यस्य स्वरूपम् -**

प्राचीनानि शिव कथावितानि काव्यानि प्रमाणेन बृद्धन्ति अपि काव्यलक्षणसम्पादनार्थ तेषु वर्णनाधिक्यमेव द्रष्टार। यथा मंसकस्य श्रीकण्श्चरिते पञ्चविंशतिसर्गेष वर्तमानेष्वपि अष्टादशसर्माः केवल काव्यलक्षणसम्पादनार्थ विविधवर्णनपराः। यन्ते केवलं सप्तसु सर्गेषु त्रिपुरासुरसंहारकचैव वर्णिता।
एवं रत्नाकर कृते हरविजयकाव्ये पत्राशन (50) सर्गाः वर्तन्ते तत्रापि बहूनि वर्णनानि अन्धकासुर संहारकौव इस दृष्य। एव नामतः तानिकाव्यानि शिववर्णनप्रान्यपि लौकिकवासनाः एव तेषु काव्येष दृश्यन्ते। कालिदासस्य कुमारसंभव कथा बाल बाणभट्टस्य पार्वती परिणयनाटकम् इत्यादीन्यपि शिवकथा एकदेश निरुपकाणि। शिवानन्दलहरी पुष्पदन्तकृत शिवमहिम्नः स्तोत्र एक प्रभृतीनि केवल स्तोत्रकाव्यानि। किम्ट अनया प्रशंसया इति चेन् काले अध्यदशसर्गे कविः पूर्वकृतानि चतुर्दश काव्यानि ग्रन्थान्त च शिव प्रतिपादकान उदाहृतवान्। तेभ्यः मम शिवकथामृतं उत्तममिति सूचथितुमेव कविः तथा गणितवान् इति समग्र कायाध्ययनेन स्पष्टम भवति।

शिवकयाम्रतं नाम का शिव शब्दस्य शुभं सुखार, यानन्दः इत्यादयः अर्थात वर्तन्ते। सगुणः साकारः, भक्तैः पूज्यः महेश्वरः शिवशर पञ्चदशसर्गे सप्तचत्वारिंशत् श्लोकाः वर्तन्ते। पञ्चदशे षोडशे सर्गे अपि शिवस्य लीलावताराः वर्णिताः।

अर्धनारीश्वरः - ब्राह्मा स्वशक्त्यनुसारेण प्रजाः सृष्ट्वापि बह्वीः प्रजाः उत्पादयितुं न शशाक। एक एव स्रष्टा एकैकशः प्राणिनः सृष्टिः यत्नेकर्तव्या इति प्राणिनां संख्या वृद्धिः नासीत्। तदा आकाशवाणी एवमुवाच। ब्रह्मन् मैथुन सृष्ट्या प्रजाः सृजा इति। शिवादेव सर्वाः स्त्रियः उत्पन्नाः शिवप्रसादेन विना तासु मैथुन सर्गो नभवतीति निश्चित्य ब्रह्मा शिवमुद्दिश्य चिरं तपस्तेपे। शिवोपि तपसा तुतोष। ब्रह्माणां एवं जगाद। ते तपसा तुष्टः मम अर्धभागं ते दास्यामि। किन्तु शक्त्यादिनसर्गः न भवति पार्वतीं स्तुहि सा ते शक्तिं दास्याति। ब्रह्मापि पार्वतीं बहुधा स्तुतवान् सापि प्रीता ब्रह्मणे शक्तिं ददौ। एवं शिवशक्त्योः अनुग्रहेण मैथुनसृष्टिः जाता। स एव अर्धनारीश्वर अवतारः। एवं षड्भिः श्लोकैः (1 to 6) अर्थनारीश्वरावतारः वर्णितः।

**नन्दीश्वरावतारः -**

शिलादनामक महर्षिः सुतार्थी इन्द्रमुद्दिश्य तपश्चकार। प्रीतः इन्द्रः वरं दातुमागतः। शिलादः अजरामरं पुत्रं मे देहि इति वरं ययाचे। इन्द्रोपि नाहं शक्तः ब्रह्मा नारायणो वा न शक्तः एक एव शिवः तादृशं पुत्रं दातुं समर्थः इति। शिलादोपि शिवमुद्दिश्य तपश्चकार। शिवोपि प्रसन्नः वरं वृणीष्व इति शिलादमवदत्। त्वत्सदृशं पुत्रं देहि इति वरं ययाचे। तथास्तु इति उक्त्वा शइवः अन्तर्ददे। तदा शिलादः महान्तं यज्ञमकार्षीत् यज्ञाङ्गणे प्रलयाग्नि सदृश तेजस्कः पुत्रः आविर्बभूव। शिलादोपि तं पुत्रं मत्वा नाम्ना नन्दिनं चकार। नन्दी अपि अधीतसर्वविद्यः शिवभक्तोऽभूत्। नन्दी चिरं शिवमुद्दिश्य तपस्तेपे शिवोपि तत्राविर्बभूव।सा रात्रिः तदानीं शुभप्रदा आसीत्। यस्यां रात्रौ शिवः नन्दिने दर्शनं ददौ। तदार्भ्य सा शिवरात्रिः इति नाम्ना प्रसिद्धा अभूत्। नन्दी परमेश्वरे स्थिरां भक्तिं वव्रे। अपि च तं प्रमदगणेश्वरं चकार। अपि च यत्राहं प्रतिष्ठितः त्वमपि तत्र प्रतिष्टितो भविष्यसि इति नन्दिने वरं ददौ। एवं द्वदशस्लोकैः (7 to 18) नन्दीश्वरावतारः वर्णितः।

**भौरवावतारः** (19 to 30) -

एकदा ब्ह्मविष्णुमहेश्वरेषु को वा श्रेष्ठः इति महान् विवादो अभूत्। ते वेदान् पप्रच्छुः वेदाः शिव एव परमात्मा इति वेदाः ऊचुः। ततो विष्णुब्रह्मणो वेदान् एवमाहुतुः युष्माकं सिवे एव पक्षपातः, अतः तन्महिमैव वेतेषु विस्तरेण वर्णितः। पुनः ब्रह्मा अवादीत् अहमेव लोकान् स्थिरान् अस्थिरान् च करोमि। विष्णुः लोकान् पाति एवं प्रसिद्धे शिवः कर्ता हर्ता च कथं भविष्यति इति। पुनः तौ ओंकारं तमेव प्रश्नं पप्रच्छुः सोपि वेदाः इव शिव एव महेश्वरः इत्याह। एवं उक्तावपि तौ न प्रशान्तौ। तदा कुपितः शिवः भैरवं पुरुषं सृष्ट्वा एवमवदत्। भैरव, यदा यमः अपि त्वत्तः बिभेति तथा भीकरो भव इति कालोपि अस्मात् भीतः इतिकारणेन शिवेन सृष्टः पुरुषः नाम्ना कालभैरवः अभूत्। शिवोपि भैरवं काश्याः अधिपतिं चकार। भैरवः स्व रखेन ब्रह्मणः पञ्चमं शिरः बिभेद। ततः अपगत गर्वः ब्रह्मा भैरवं शिवं च शरणं जगाम। भैरवोपि ब्रह्महत्या दोषेण कलङ्कितः तदा शिवः एवनवदत्। त्व् ब्रह्मणः कपोले भिक्षां चर यावता कालेन कपालः तव हस्तात् पतितः न भवति तावन्तं कालं ब्रह्महत्या दोषः नापसरति इत्याहुः। भैरवः तं कपालमादाय सर्वा लोकान् चचार। काशी क्षेत्रे भैरवः कपालात् मुक्तः। तदारभ्य काश्यां कपालमोचनतीर्थं जातम्। एवं एकादशश्लोकैः (19 to 30) भैरवावतार कथा वर्णिता।

**अर्थपत्यवतारः** (अथवा) अग्निदेवावतारः ( 31 to 37) -

पुरा नर्मदा तीरे सुधार्म नामक नगरे शाण्डिल्या गोद्रे विश्वानर नामकः ब्राह्मणः आसीत्। स च शिवभक्तः। सोपि बहुभिःस्तवैः महेश्वरं स्तुतवान्। प्रीतः परमेश्वः तस्मै वरं ददौ। विश्वानरस्य पत्नी शुचिष्मती। विश्वानरः शुचिष्मत्यां शिवसदृशं पुत्रं ययाचे। महेशः तथेति उक्त्वा तयोः पुत्रः बभूव। द्वादशवर्षवयस्कः पुत्रः शिमुद्दिश्य तपश्चकार। इन्द्रः कुमारान्तिकमागत्य वरं वृणीष्व इत्याह। मह्यं वरं दातुं ते सक्तिः नास्ति। शिवः ओन ततेर समर्थः इत्याह। कुपितः इन्द्रः बालकं हन्तुं वज्रायुधं गृहीतवान्। शइवमहिम्ना इन्द्रः स्तब्ध बाहुः अभूत्। इन्द्रोपि शिवस्तुत्व  पुनः बन्धनात् मुक्तः बालोपि शिवात् प्राप्तवरः अजरामरो बभूव। स एव वैश्वारः अग्निदेवं पुराणेषु प्रसिद्धः। एवं सप्तभिः श्लोकैः (31 to 37) अग्विदेवकथा वर्णिता।

**वृषभावतारः ( 38 to 47) -**

पुरा देवाः राक्षसाश्च मिलित्वा समुद्रमथनं चक्रुः। तत्काले जातानि बहूनि वस्तूनि देवाः एव गृहीतवन्तः। विष्णुः लक्ष्मीं कौस्तुभं च गृहीतवान्। रावतं इन्द्रः गृहीतवान्। कामधेनुः मिनिभिः गृहीता। राक्षसाः सुरामङ्गीचक्रुः। इतराः अप्सरसः देवलोकं जग्मुः। किन्तु अमृतस्य कृते देवदानवयोः महत् युद्धमभूत्। तत्र देवैः विजयः प्राप्तः। विष्णुः मोहिनी रूपेण देवेभ्यः एव अमृतं ददौ। राक्षसाः पातालं जग्मुः। विष्णुः अपि पातालं गत्वा राक्षस स्त्रीषु आसक्तः बभूव। तासु बहून् पुत्रान् उत्पादयामास। विष्मुपुत्राः राक्षसाः बलिष्टाः लोककण्टकाः बभूवुः। देवैः प्रार्थितः शिवः वृषभरूपेण पातालं प्रविश्य विष्णपुत्रान् राक्षसान् सर्वान् श्रृङ्गाभ्यः विधार्य हतवान्। सपदि पातालात् वैकुण्ठं गच्छ इति विष्णुमादिदेश। स्वयं कैलासं जगाम। एवं दशभिः श्लोकैः (38 to 47) वृषभावतारः वर्णितः।

सर्गेस्मिन् 51 श्लोकैः शिवावतारकथाः वर्णिताः।

दुर्वासोऽवतारः (1 to 13) ब्रह्मपुत्रः अत्रिः ब्रह्मविष्णुमहेश्वरान् उद्दिश्य चिरं तपश्चकार। ततः त्रिमूर्तयः वरदायिनः अत्रेः आश्रमं जग्मुः। अत्रिः सूयं मम पुत्राः भवत इति वरं ययाचे। ततः ते अपि अस्माकं अंशजाः पुत्राः ते भविष्यन्तीति ऊचुः। ब्रह्मणः अंशात् चन्द्रः विष्णोरंशात् दत्तः, शिवस्यांशात् दुर्वासाः इति अत्रेः त्रयः पुत्राः बभूवुः। एकदा दुर्वासाः अम्बरीषाय कुपितः तदा अम्बरीष राक्षार्थं विष्णुना नियुक्तं चक्रायुधं दुर्वासं हन्तुं आगतम्। आकाशवाणी सुदर्शनमेवं अवदत्। अयं मुनिः रुद्रावतारः त्वया हन्तुमसाध्यः मुनिमेव त्वं शरणं व्रज। इति सुदर्शनोपि मुनिं प्रसाद्य स्वभवनं ययौ। दुर्वाससः अवतारे शइवः हंसडिबकौ राजानौ राक्षसांशजौ जघान। दृपादात्म-जायैः वरं ददौ। एवं त्रयोदशभिः श्लोकैः (1 to 13) दुर्वासोऽवतारः वर्णितः।

**हनुमदवतारः (14 to 23) -**

एकदा अमुदमथनकाले मोहिनी रूपमवलोक्य शिवः स्कलित-वीर्योऽभूत् सप्तर्षयः तद्वीर्यं गृहीत्वा अजन्याः गर्भे निदधुः। तस्मात् हनूमान् इति नाम्ना पुत्रः समुत्पन्नः। जागमात्रः स बालः फलभ्रान्त्या सूर्यं गृहीतवान्। सूर्यात् सर्वाः विद्याः अधीतवान् ततः रामायणे हनुमत् कृतानि कर्माणि अष्टाभिः श्लोकैः वर्णितानि। एवं दशभिः श्लोकैः (14 to 23) हमुमदवतारकथा उपवर्णिता।

**अश्वथाम्नः अवतारः ( 24 to 35) -**

भरद्वाजस्य पुत्रः बृहस्पतेः अंशात् अयोनिजः द्रोणनामकः उत्पन्नः। स च कौरवसहायकं पुत्रं शिवप्रसादात् प्राप्तवान्। स एव अश्वथाम। अश्वथआम्नः पराक्रमं दृष्ट्वा भीमादयोपि तस्मात् बभ्यति स्म। एकदा पुत्रशोकार्तः अर्जुनः अश्वथामानां अनुदधाव। अस्थाम अर्जुनात् भीतः ब्रह्मशिरः अस्त्रं ममोच। कृष्णः ब्रह्मशिरः उपसंहर्तुं अर्जुनमादिदेश ततः पराजितं अश्वथामानं द्रौपदी गुरुपुत्रः इति कृपया चक्षमे। अश्वथाम्ना प्रयुक्तं अस्त्रं उत्तरायाः गर्भं ददाह। कृष्णः अपि तत् गर्भं रक्षित्वा तस्मादस्त्रादेव पाण्डवान् रक्षितुं कृतनिश्चयः। पाण्डवाः सर्वे अश्वथाम्नः पादयोः पतित्वा शरणं ययाचिरे। अश्वथामापि तेभ्यः अभयं दत्वा वरान् ददौ। एवं द्वादशभिः श्लोकैः (24 to 35) अश्वथाम कथा वर्णिता।

**किरातावतारः (36 to 51) -**

अर्जुनः दिव्यास्त्र प्राप्तये शिवमुद्दिश्य तपश्चकार। शिवः परीक्ष्य दिव्यास्त्रं देयमिति निश्चित्य किरातरूपेण अर्जुनान्तिकं आजगाम। सूकरव्याजेन तयोः महान् संग्रामः अभूत् पराजितः अर्जुनः शिवं बहूधा तुष्टाव। स च स्तवः (41 to 46) षड्भिः श्लोकैः वर्णितः। परमेश्वरः तस्मै दिव्यमस्त्रं दत्वा जयं प्राप्नुहि इति आशिर्भिः योजितवान्।

सप्तदशसर्गे श्रीमन्नारायणः शिवं शतनामभिः स्तुत्वा सुदर्शनायुधं प्राप्तवान् इति कथआ उपवर्णिता। तत्र शिवशतनामस्तोत्रं पञ्चदशश्लोकैः वर्णितम्। (4 to 18 श्लोकाः) ततः कदाचित् नेत्र रोगेण पीडितः। कविः सूर्यं स्तुत्वा स्व नेत्ररोगात् विमुक्तः इति स्वयं उक्तवान्। तत्र नामसंख्या निर्देशेन सूर्यशतनाम स्तोत्रं वर्तते। तन्निरूपकाः सप्तविंशति श्लोकाः (20 to 47) वर्तन्ते।

अष्टादशे सर्गे प्रथमं प्राचीनकविभिः कृतानां शिवस्तुतिरपाणां षोडशकाव्यानां परिचयो दत्त। अनन्तरं कविः स्वकृतानां ग्रन्थानां नाम्ना परिचयं दत्तवान्। काव्यान्ते फलश्रुतिः उदाहृता।

**श्रद्धयैतस्य काव्यस्य पठनं यः करोति वै।**
**तस्यायुः शतमैश्वर्यं पुत्रपौत्रादिकं भवेत्।।**